त्येकं युगपद्वा कार्या। पुरुषसूक्तपक्षस्य षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः पुरुषो
देवता अनुष्टुप्छंदः अन्त्या त्रिष्टुप् षोडशोपचारपूजने विनियोगः॥ अथ न्यासः। सहस्रशीर्षे
ति वामकरे न्यसेत्। पुरुष एवेति दक्षिणकरे। एतावानस्येति वामपादे त्रिपादूर्ध्व इति दक्षिण
पादे। तस्माद्विराडिति वामजानौ। यत्पुरुषेणेति दक्षिणजानौ। तं यज्ञमिति वामकट्यां। तस्मा
द्यज्ञात्सर्वहुत इति दक्षिणकट्यां। तस्माद्यज्ञात्सर्वहुत ऋच इति नाभौ। तस्मादश्वा इति हृदये।
यत्पुरुषमिति कंठे। ब्राह्मणोस्य वामबाहौ। चंद्रमा इति दक्षिणबाहौ। नाभ्या इत्यास्ये। सप्तास्ये
ति नेत्रयोः। यज्ञेनेति मूर्ध्नि॥ ॥अथ पंचांगन्यासः॥ ब्राह्मणोस्येति हृदयाय नमः इति हृद
ये। चंद्रमा इति शिरसे स्वाहेति। शिरसि। नाभ्या इति शिखायै वौषट्। इति शिखायां। सप्तास्य

२५

सन्निति कवचाय हुमिति कवचं । यज्ञेनेत्यस्त्राय फडित्यस्त्रं । ततः सहस्रशीर्षेत्यावाहनं । पुरुष
एवेत्यासनं । एतावानस्येति पाद्यं । त्रिपादित्यर्घ्यं । तस्माद्विराडित्याचमनं । ततः पंचामृतस्नानं ॥
आप्यायस्व गोतमः पयो गायत्री । क्षीरस्नाने विनियोगः । ॐ आप्यायस्व । वंदनादि पंचोपचारा
न्कृत्वा ॐ भूर्भुवः स्वरिति स्नानमपसार्य । दधिक्राव्णो वामदेवो दध्यनुष्टुप् दधिस्नाने विनियोगः
स्वाहाकृतमः
ॐ दधिक्राव्णः । पंचोपचारादि । घृतं मिमिक्षे गृत्समदो घृतं त्रिष्टुप् । ॐ घृतं मिमिक्षे पंचोपचारादि ।
मधुवाता गौतमो मधु गायत्री मधुस्नाने वि॰ ॐ मधुवाता॰ पंचोपचारादि॰ स्वादुर्वेनः शर्कराजग
ती शर्करास्नाने विनियोगः । ॐ स्वादुः । पंचोपचारादि । यत्पुरुषेणेति सर्वेण पुरुषसूक्तेन वलिं
गालिस्य शुद्धोदकस्नानं । आचमनं दत्त्वा तं यज्ञं यज्ञोपवीतं परममिति च यज्ञोपवीतं । तस्माद्य
ज्ञात् । युवा सुवासा इति वस्त्रं । तस्माद्यज्ञात्सर्वहुत ऋचः इति गंधद्वारामिति च गंधं । अक्षताश्च ।
तस्मादश्वा इति माल्यं । यत्पुरुषं॰ । योनस्य इति च धूपं । ब्राह्मणोस्य । श्रिये जात इति दीपं । चंद्रमा
स्वादुः पवस्वेति नैवेद्यं । आचमनं दत्त्वा नाभ्या आसीत् । याः फलिनीरिति फलं । सप्तास्यासन्नि

तुला

२६

तितां स्थलं। यज्ञेन हिरण्यरूपः। हिरण्यगर्भगर्भस्थमितिदक्षिणां। नानामंत्रैः पुष्पांजलिं दत्वा प्र
दक्षिणानमस्कारस्तुतीः कुर्यात्। आवाहनं न जानामि। अपराधसहस्राणि• मंत्रहीनं• यस्य
स्मृत्या चेति क्षमाप्य परिसमाप्तिं वाचयेत्। एतावद्दशकोऽनं सूर्याय नमः इदमासनमित्यादि प्र
त्येकं वा सूर्यादिदेवताभ्यो नमः इति समुदितेभ्यो वा अर्पणवादि वक्तुं श्री नमोन्तनाममंत्रेण सज्जये
त्। सगंधवस्त्रपुष्पनैवेद्यबल्यादिषु विशेषो यज्ञविशेषात् ग्रंथांतरतोऽवसेयः। वेद्युपरि हस्तमा
त्रे फलपुष्पशोभितं वितानकं बृहस्पतिदैवतं सूर्यादिदेवताभ्य इति दं न ममेति संकल्पनीयं।
॥ ॥ एवं सञ्जायां कृतायां सर्वकुंडेष्वीशः ऋग्वेदिनो एककोऽब्रह्माः परो होमकर्त्रेत्येवं भूत्वा आकुशा
स्वागृह्योक्तविधिनाग्निस्थापनानन्तरमन्वाधानादि कुर्यात्। तत्रान्वाधाने विशेषः। अत्र प्रधा
नं सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेतुरूपान्नवग्रहान्। ईश्वरोमास्कंदविष्णुब्रह्मे
न्द्रयमकालचित्रगुप्ताख्याश्चाधिदेवताः। अग्न्यप्भूमिविष्णुइंद्रेन्द्राणीप्रजापतिसर्पब्र
ह्माख्याः प्रत्यधिदेवताः विनायकदुर्गावाय्वाकाशमश्व्याख्यान्पंचलोकपालान् इन्द्राग्निय

२६

26

अन्वाधान

मनिर्ऋतिवरुणवायुसोमेशानानंतब्रह्माख्यदशदिक्पालान् ध्रुवाध्वरसोमापोऽनिलानल
प्रत्यूषप्रभासाख्यान ष्टौवसून् धातार्यममित्रवरुणांशभगेन्द्रविवस्वत्पूषपर्जन्यत्वष्टृविष्णा
ख्यान् द्वादशादित्यान् वीरभद्रशंभुगिरिशाजैकपादाहिर्बुध्न्यपिनाकिभुवनाधीश्वरकपा
लिविशांपतिस्थाणुभगाख्यानेकादशरुद्रान् आवहप्रवहोद्वहसंवहविवहाख्यान्सप्त
मरुतः ब्रह्मविष्णुरुद्रार्कवनस्पतीन् पंच एवं पंचाशीतिदेवताः मिलाप्य द्रव्येणाल्पैकमष्टो
त्तरशतसंख्यमष्टाविंशतिसंख्यमष्टादशसंख्यया वा हुतिभिः सद्योयक्ष्ये इति। इष्टमहवना
नंतरं प्राक्कुंडाद्दक्षिणत उत्तराभिमुख उपविश्य यजमानः कुशजलहस्तोऽद्यप्न्यागंसर्वेतो हेश
न युगपत् कुर्यात्। वद्धक तंके होमेऽत्याहुतित्यागस्य कर्तुमशक्यत्वात्। तद्यथा। देशकालौ
स्मृत्वा तुलापुरुषमहादानकर्मणि इदं तिलाज्य द्रव्यं इदं स्रुक्का आघाराज्यभागदेवता अन्वा
धानोक्तप्रधानदेवताः स्विष्टकृदाद्युत्तरांगदेवताश्च चन्द्रार्थं तेनो हि रूपेतास्यो होमार्थं मया त्य
क्तमिति। यजुर्वेदीयादयोपि एको ब्रह्मापरो होतेति मत्वा स्वस्वशाखोक्तविधिना दक्षिणादिकुंडे

तुला०

२२

27

५०

८५

क्रमेणाग्निप्रणयनानंतरं कर्मक्रियासुः। तत्रापितत्रशाखोक्तसर्वांगदेवताः सर्वत्रप्रधानदेव
तास्तत्रशाखोक्तोत्तरांगदेवताश्चोहिशपकुंडदक्षिणेपविष्टोयजमानोद्रव्यत्यागंसर्वविधुगप
देवकुर्यात्। होमश्चप्रतिकुंडेष्वस्वशाखोक्तप्रणवादिस्वाहांतंतत्रदैवत्यमंत्रैःस्त्राधिदेवताहं
होतृकीर्तनसर्वकंनवग्रहाधिदेवता। विनायकादिपंचलोकपालदशदिक्पालाष्टवसुद्वादशा
दित्यैकादशरुद्रसप्तमरुन्ब्रह्मविष्णुरुद्राद्वनस्पतीनांप्रत्येकमष्टोत्तरशतमष्टाविंशत्या
तिद्वादशवाहुतयद्रत्येवैहमेनकार्याः। वस्वादित्यरुद्रमरुतांमंत्रानुरोधेनसमुदितानामेवहोमः
प्रत्येकंमंत्राभावात्। प्रणवादिचतुर्थ्यंतस्वाहांतप्रत्येकनाममंत्रैःप्रत्येकंवाहोमः। तत्रसमुदित
पक्षेएकपंचाशद्देवताःप्रत्येकपक्षेपंचाशीतिः। तत्राद्यपक्षेष्टोत्तरशताहुतिषुप्रतिकुंडं
वसहस्राणिपंचशतान्यष्टौवाहुतयः। ५५०८। अष्टाविंशत्याहुतिषुचतुर्दशशतान्यष्टावि
शतिश्चाहुतयः। १४२८। द्वादशाहुतिषुषट्शतानिद्वादशवाहुतयः। ६१२। पंचाशीतिदेव
तापक्षेष्टोत्तरशताहुतिषुप्रतिकुंडंनवसहस्राणिएकशतमशीतिश्चाहुतयः। ९१८०। अष्टावि

२२

प० १७४ अप

त्यात्याहुतिष्वसहस्रमष्टमंत्रीणिमालान्यशीति ॥ ३२८ ॥ द्वादशाहुतिपक्षे विंशत्युत्तरं सहस्रम ।
हुतयः ॥ १०२० ॥ रूपनारायणीयेन्तु । रुद्रेभ्योहोमेनोक्तं तन्मते पंचाशच्चतुस्स नतिर्वा देवताः ॥
होमकाले द्वारपालकाः प्रतिद्वारं शांतिं जपेयुः । रात्रिसूक्तं चरौद्रं च पावमानं सुमंगलं । पूर्वतो
बह्वृचः शांतिं पठन्नास्तउदङ्मुखः । शांतिः शन्नइन्द्राग्नीत्यादिसूक्तं । शाक्रं रौद्रं च सौम्यं च कौष्माण्डं
शान्तिमेव च । पाठयेद्दक्षिणेद्वारे यजुर्वेदिनमुत्तरे । शांतिः अचंवावमित्यादिरध्यायः । सुपर्णमथ
वैराजमाग्नेयं ब्रह्मसंहितां । ज्येष्ठसाम तथा शांतिं छंदोगः पश्चिमे पठेत् । शांतिरवीधये त्यादिसा
म । शान्तिसूक्तं च सौरं च तथा शाकुनकं शुभं । पौष्टिकं च महाराजमुत्तरेणाप्यथर्ववित् । शान्तिः
सन्न इंद्राग्नी त्यादि जाकुजयं । गुरुसूक्तसर्वकर्माण्यध्यत्तयातिष्ठेत् । अथ जातवेदिनां होममंत्राः ॥ आ
कृष्णेनाहिरण्यस्तूपः सविता त्रिष्टुप् होमे विनियोगः ॥ ॐ आकृष्णेनेत्यादि स्वाहान्ते पठिते आहुति
प्रक्षेपः कार्यः । एवं सर्वत्र । आप्यायस्व गोतमः सोमो गायत्री ॥ २ ॥ अग्निर्मूर्द्धा । विरूपोंगारको गाय
त्री ॥ ३ ॥ उद्बुध्यध्वं बुधः सोमो बुधस्त्रिष्टुप् ॥ ४ ॥ बृहस्पतेऽत्यत्समदो बृहस्पतिस्त्रिष्टुप् ॥ ५ ॥ शुक्रः पार

१।८।७।१

तुला

२८

।७।कयानोवामदेवोराडुगाय
त्रारः श्रुक्रो द्विपदाविराट्।६। शामग्निरितिविरिः शनिरुत्क्रिकृ।१।गौरी
त्री।८।केतुमधुछंदाः केतवोगायत्री।अथाधिदेवतानां।त्र्यंबकं वसिष्ठोरुद्रोनुष्टुप्।गौरी
र्मिमायदीर्घतमाउमाजगती१ब्रह्मर्कंदोदीर्घतमास्कंदस्त्रिष्टुप्।२।विष्णोर्दीर्घतमाविष्णुस्त्रिष्टु
प्।४।ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्।५।इंद्रंवोमधुछंदाइंद्रोगायत्री६यमायसो
मंयमोयमोनुष्टुप्७मोषुणोघोरः कण्वःकालोगायत्री८तमोवाजं प्रस्कण्वस्त्रिरग्नयोमरुत
द्।।अथप्रत्यधिदेवतानां।अग्निकाण्वोमेधातिथिरग्निर्गायत्री।११।अप्सुमेमेधातिथिरापो
नुष्टुप्।स्योनामेधातिथिर्भूमिर्गायत्रीइदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री४।इंद्रमेधाति
गृत्समदाइंद्रस्त्रिष्टुप्५इंद्राणींवृषाकपिरिन्द्राणीपंक्तिः६।प्रजापतेहिरण्यगर्भः प्रजापति
स्त्रिष्टुप्।७आयंगौः सार्पराज्ञीसर्पागायत्री।८।ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्
र्द।। ।।अथाविनायकादीनां।गणानांत्वागृत्समदोगणपतिर्जगतीजातवेदसेकश्यपोदुर्गास्त्रि
ष्टुप्रतवत्वायोव्यश्वआंगिरसोवायुर्गायत्रीआदित्यप्रत्नस्यकाण्वोगायत्री४।एषोउषाप्रस्क

२८

28

ण्वोऽश्विनौ गायत्री। ५। अथ दिक्पालानां। इंद्रं विश्वाऽजेता माधुच्छंदस इंद्रोनुष्टुप्। अग्निर्मेधाति
थिरग्निर्गायत्री। २। यमाय सोमं यमो यमोनुष्टुप्। मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री। ४। तन्नो वा
मदेवो वरुणस्त्रिष्टुप्। ५। तव वायो व्यश्वो वायुर्गायत्री। ६। सोमो धेनुं गोतमः सोमस्त्रिष्टुप्। ७। तमी
शानं गोतम ईशानो जगती। ८। सहस्रशीर्षा नारायणोऽनंतोनुष्टुप्। ९। ब्रह्म जज्ञानं गोतमो वामदे
वो ब्रह्मा त्रिष्टुप्। १०। वसूनां। ज्मया अत्र मैत्रावरुणो वसिष्ठो वसवस्त्रिष्टुप्। आदित्यानां। त्यान्नु स
प्तदोमत्स्यो द्वादशादित्या गायत्री। रुद्राणां। आ रुद्रासः श्यावाश्व एकादश रुद्रा जगती। मरुतो
यस्य राहूगणो मरुतो गायत्री। ब्रह्मणः। ब्रह्म जज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुप्। विष्णोः। इदं विष्णुः का
ण्वो मेधातिथिर्विष्णुर्गायत्री। रुद्रस्य। कद्रुद्राय घोरः कण्वो रुद्रो गायत्री। अर्कस्य। अग्निरस्मि
विश्वामित्रोऽर्कस्त्रिष्टुप्। वनस्पतेः। वनस्पते गर्गो वनस्पतिस्त्रिष्टुप्। अथ तद्देवत्यानि जप्यानि
सूक्तानि। ह्वयाम्यग्निमेकादशर्चस्य सूक्तस्य हिरण्यस्तूप ऋषिः सविता देवता आद्यायाः पादत्रयो

ॐ जप्यानि

ग्निमित्रावरुणौरात्रिष्टुप्देवतात्रिष्टुप्छंदः आद्यानवत्योजगतीसर्वप्रीतयेजपेविनियोगः।इ
याम्मग्निः देव ११।त्वंसोमेतित्रयोविंशत्यृचस्यसोमसूक्तस्यगोतमऋषिः सोमोदेवतापंचम्या
दिद्वादशगायत्र्यंत्यसदश्युष्णिक्शेषास्त्रिष्टुभः सोमप्रीतयेजपेविनियोगः।त्वंसोम॰ गाविष्टो
२२ समिधाग्निमितित्रिंशदृचस्यसोमसूक्तस्यविरूपआंगिरसोग्निर्गायत्रीसोमप्रीत॰ समि
धाग्निंसोतिर२३॰ उद्बुध्यध्वमितिद्वादशर्चस्यबुधोविश्वेदेवानवमीद्वादशीचजगतीपंचमीबृहती
चतुर्थीषष्ठीचगायत्रीशेषास्त्रिष्टुभोबुधप्री॰ उद्बुध्यध्वं॰ प्रीतये१२ यस्तस्तंभेत्येकादशर्चस्यवाम
देवोनवानांबृहस्पतिरंत्ययोरिन्द्राबृहस्पतीदशात्रिष्टुभस्तृ?यांत्याजगतीबृहस्पतिप्रीतः यस्त
स्तंभः मरुती॰ ११।शुक्रंतइतिचतसृणांभरद्वाजःपूषात्रिष्टुप्द्वितीयाजगतीशुक्रप्रीतः शुक्रं
तेअन्यद्॰ संच४।अपोहिष्ठेतिनवर्चस्यांबरीषसिंधुद्वीपऋषयआपःसप्तगायत्र्यः पंचमीवर्धमाना
सप्तमीप्रतिष्ठांत्येनुष्टुभौशान्तिप्रीत॰।आपोहिष्ठा॰ वर्चसा९।कयानइतिपंचदशर्चस्यवामदे

तुला
२९
29
२९

वदिंद्रोगायत्रीतृतीयापादनिचृत्त्वराद्रू प्रीतये० कयानश्चित्र० मिवोपरि ९५। युंजंतीतिद्वया
र्चस्यमधुच्छंदाआद्यानांतिसृणांअंत्ययोरिंद्रश्चतुर्थीपंचम्यष्टमीनवमीनांमरुतः पंचम्याःस
षष्ठ्याश्चेन्द्रामरुतोगायत्री केतुंकृ० युंजंतिब्रध्नंररुषसः ९०॥ ॥इतिनवऋचसूक्तानि॥ ॥अथा
छिदेवतासूक्तानि। इमारुद्रायेत्येकादशर्चस्यकुत्सोरुद्रोजगती अंत्येत्रिष्टुभौरुद्रप्री० इमा
रुद्राय० तद्यौः ११ आपोहिष्ठेतिनवर्चस्याम्बरीषसिंधुद्वीपऋ० आपोगायत्री पंचमीवर्धमाना
सप्तमीप्रतिष्ठा अंत्येद्वेअनुष्टुभौ उमाप्री०। आपो० वर्वसा। ९। प्रातर्युजेत्येकविंशत्यृचस्यमेधा
तिथिराद्यानांचतसृणामश्विनौचतसृणांसविताद्वयोरग्निरेकादशदेव्योद्वादश्याइंद्राणीवरु
णान्यग्नाय्योद्वयोर्द्यावापृथिव्यौपंचदश्याःपृथिवीषण्णांविष्णुर्गायत्रीछंदःप्री० प्रातर्युजा०
पदं २१। अतोदेवेतिषण्णांमेधातिथिर्विष्णुर्गायत्रीहरिप्री०। अतोदेवा० पदं। २६। अग्निआयाहि
तिविंशत्र्यृचस्यभर्गोग्निःप्रगाथब्रह्मप्रीतये० अग्नआयाहिवीतयेइतित्रिःग्निनः २० इंद्रंविश्वाइव

तुला॰

३॰

इत्यष्टर्चस्य जेनामा धुच्छंदस इंद्रो नुष्टुप् इंद्रप्रीत्यर्थे॰। इंद्राविश्वा॰ यसीः॥१८ आयंगौरिति ति
सृणांसार्प्यराज्ञात्मागायत्री यमप्री॰ आयंगौष्टप्लि: ष्टुलिंग॥३॥ परंमृत्योरिति दतस्रणांसंकु
सुकोमृत्युस्त्रिष्टुप् कालप्री॰ परंमृत्यो॰ तेनाध॥ संचित्रेत्यस्यलरद्वाजो मरुतस्त्रिष्टुप् चित्र युम
प्री॰। सचित्रचित्रः युवस्व॰॥१॥॥ अथप्रत्यधिदेवतानां॥ ॥ अग्निंदूतमिति द्वादशर्चस्य मेधा
तिथिरग्निः बध्या आधेयादेनिर्मथ्या आहवनीयो गायत्री अग्निप्री॰ अग्निंदूतं॥ स्रुन:१॥ कस्येति पंच
दशार्चस्याजीगर्तिः शुनःशेप आद्यायाः को द्वितीयायाः अग्निस्तिसृणां सविता दशानां वरुणस्तृतीया
द्यास्तिस्रो गायत्र्यः शेषास्त्रिष्टुभः अग्निकस्य नूनं॰ स्याम १५। स्योनामेधातिथिः पृथिवी गायत्री भू
मिप्री॰ स्योनापृथिवि॰ प्रथः॥१॥ सहस्रशीर्षेति षोडशर्चस्य नारायणः पुरुषोनुष्टुप् अन्त्यात्रिष्टु
प् विष्णुप्री॰ सहस्रशीर्षा॰ देवाः॥१६॥ इंद्रायेत्यस्य कश्यपः पवमानसोमो गायत्री इंद्रप्रीत्य॰ इंद्राये
दो॰ सदं॥१॥ इमांखनामीति मध्यमिन्द्राणी न्द्राणपनुष्टुबंत्या पंचपदा पंक्तिः इंद्राणीप्री॰ इमांखना

३॰

३०

मि॰ धावतु॰ द्दा प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापति प्री॰ प्रजापते॰ यीलां॰ कालिकोव
सिष्ठः सर्प्पस्त्रिनुष्टुप् सर्पप्रीतये॰। कालिकोनामसर्प्पो॰ हनः २। ब्रह्मादेवानां दैवोदासिः प्रतर्द्दनोब्र
ह्मात्रिष्टुप् ब्रह्मप्री॰ ब्रह्मा॰ रेलं॰ ॥२॥ ॥अथविनायकादिपंचानां॥ ॥आतूनइतिनवानांकुसीद
काण्वोगणपतिर्गायत्री विनायकप्री॰ आतूनइंद्र॰ रंते। ८। जातवेदसेकश्यपोजातवेदास्त्रिष्टुप्दु
र्गाप्री॰ जातवेदसे॰ त्यग्निः। १। काण्वाज्रितोवायुरुष्णिक् वायुप्री॰ काण्वाश्विष्ठः हिता। १। आदित्त्स
आकाशोगायत्री आकाशप्री॰ आदित्प्रत्नस्य॰ दिवा॰ १। एषोउषाप्र स्कण्वोश्विनोगायत्री अश्वि
नप्री॰ एषो॰ हव॰ १॥ ॥अथदशलोकपालानां। इंद्रंविश्वेत्यष्टानांजेतामाधुच्छंदसइंद्रोनुष्टुप् इं
द्रप्री॰ इंद्रंविश्वा॰ यसी॰ ८। अग्निः अग्निः सप्तिमितिशतानां सोचीकोग्नि वैश्वानरोग्निस्त्रिष्टुप्
अग्निप्री॰ अग्निः सप्तिं॰ जस्व ७। परेयिवांसमितिषोडशानां वस्ययमः पंचानां यमः षष्ठ्यांगिरस
स्त्रिसृणांपितरश्चित्सृणां श्वानौचतसृणांयमो द्वादशात्रिष्टुप्तोहेत्रिष्टुप्तौपादनिवृत्तौपंचदशी
वृहती षोडश्यनुष्टुप् यमप्री॰ परेयिवांसं॰ हिता॰ १६ वेत्याहिविश्वमनावैयश्वोनिश्चातिरुष्णिक्

तुला·

नि॒ऋतिऋषी· वैश्वाहि· मिव·१। मोषुविति पंचानां वसिष्ठो वरुणो गायत्री अंत्या जगती वरुणऋषी·
मोषुवरुणरीरिषः। वातइतितिसृणां वातायनउलो वायुर्गायत्री वायुऋषी· वातआवातु· सी
वसे· ३। त्वंसोमेतिग्रहवत्। २४ इमारुद्रायेतिप्रथर्ववत्।११ सहस्रशीर्षेति प्राग्वत् १६। त्वमि
द्रुर्गोग्निर्बृहती ब्रह्मऋषी·। त्वमित्सप्रथा· धरुः।१। मयाग्नेतेति वसूनां होमवत्।१। इमागिरइ
तिसप्तदशर्चस्यगार्त्समदः कूर्म आदित्यस्त्रिष्टुप् आदित्यऋषी· इमागिर· वीराः २२ आतइति
पंचदशर्चस्यगार्त्समदः कूर्मो रुद्रस्त्रिष्टुप् ईशानऋषी· आतेपितः· वीराः· ~~१२ आतइति पंचदश~~
~~र्चस्यगार्त्समदः कूर्मस्रुद्रस्त्रिष्टुप् ईशानऋषी~~ १५ मरुतोयस्येति दशानां गौतमो मरुतो गायत्री
मरुत्ऋषी· मरुतोयस्य· क्षमसि १· हिरण्यगर्भइति दशर्चस्य हिरण्यगर्भः प्रजापतिः कस्त्रिष्टुप् ब्र
ह्मऋषी· हिरण्यगर्भः· यीणां २·। सहस्रशीर्षेत्यनुतस्य प्राग्वत् १६ आतेपितरितिरुद्रस्य प्राग्वत्
१५ चित्रमिति षण्णां कुत्सः सूर्यस्त्रिष्टुप् सूर्यऋषी· चित्रं देवानां· उतद्योः ६। वनस्पतइतितिसृणां गा
गोविनस्पतिस्त्रिष्टुप् वनस्पतिऋषी· वनस्पतेवीड्वंगो· गृताय ३। एवं ऋग्वेदी कृत्वा स्विष्टकृदादि

३१

३१

31

अथर्व॰ पञ्च

प्रायश्चित्ताद्कृत्यंतं स्पर्शादिकृतिप्रायश्चित्तादिकंकर्मकुर्यात्॥॥ अथयजुर्वेदिनः कुशकंडिकानंतरप्रधा
नहोमेमंत्राः। आकृष्णेनहिरण्यस्तूपः सवितात्रिष्टुप्सूर्यप्रीतयेतिलाज्यहोमेविनियोगः। ॐआ
कृष्णेन॰स्वाहाइदंसूर्याय॰१ एवंसर्वत्र। इमंदेवावरुणः सोमोयजुः इमंदेवानांराजा २ अ
ग्निर्मूर्धाविरूपोंगारकोगायत्री। अग्निर्मूर्धा३। उद्बुध्यस्वपरमेष्ठीबुधस्त्रिष्टुप्। उद्बुध्यस्वाग्ने४ बृ
हस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्। बृहस्पतेअति५ अन्नात्प्रजापतिअश्विसरस्वतीन्द्राःशुक्रो
जगती। अन्नात्परिस्रुतः।६। शन्नोदध्यंङाथर्वणआपोगायत्री। शन्नोदेवीः७। कयानोवामदेवो
राहुर्गायत्री। कयानश्चित्र८। केतुंकृण्वन्मधुच्छंदाःकेतवोगायत्री केतुंकृण्वन्।९। अथाधिदेवतानां॥॥
त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्। त्र्यंबकं।१। श्रीश्चतेलक्ष्मीरुत्तरनारायणउमात्रिष्टुप्
श्रीश्चते२। यदक्रंदोदीर्घतमास्कंदस्त्रिष्टुप्। यदक्रंदः।३। विष्णोरराटमुतथ्यो वि
ष्णुर्यजुः। विष्णोरराटः वेत्वा४। आब्रह्मन्प्रजापतिर्ब्रह्मायजुः। आब्रह्मन्॰ल्पतां।५। सजोषाविश्वा
मित्रइंद्रस्त्रिष्टुप्सजोषाइंद्र६। असियमोतास्करजमदग्निर्दीर्घतमेसोयमस्त्रिष्टुप्असियमोअ

स्यादित्यो ७। अत्र प्रणीतोदकं स्पृशेत्। कार्षिरसि ट्टष्यडा थर्वणः कालो नु ष्टुप् कार्षिरसि॰। अत्र
विप्रणीतोदक स्पर्शः। चित्रावसो अजयाष्ट्रि अग्नसो जगती चित्रावसो॰ शीय ८ अथ जन्माधिदेवतानां।
अग्निं दूतं विरूपो अग्निर्गायत्री। अग्निं दूतं पुरो १। अप्स्वंतर्हं हस्पतिरापः प्रउष्णिक्। अप्स्वंतरमृतं।
२। स्योना मे धाति विर्थिः पृथिवी गायत्री। स्योना पृथिवि नो ३। इदं विष्णुर्मे धातिथ्रि विष्णुर्गायत्री। इदं विष्णुः।
४। त्रातारं गार्ग्य इन्द्रस्त्रि ष्टुप् त्रातारमिन्द्रं। ५। अदित्यै दध्य ङ्ङाथर्वण इं द्राणी यजुः अदित्यै रा स्ना॰
स्त्रीबः ६। प्रजापते वरुणः प्रजापतिस्त्रि ष्टुप् प्रजापतेनत्व ७। नमोस्तु देवाः सर्पास्त्रि ष्टुप् नमोस्तु सर्पेभ्यः
८। ब्रह्म प्रजापतिर्ब्रह्मा त्रि ष्टुप् ब्रह्म जज्ञानं ९॥। अथ विनायकादि देवानां। गणानां प्रजापतिर्गणप
तिर्यजुः गणानां त्वा॰ मम। १। अंबे प्रजापतिर्दुगनुष्टुप् १। अंबे अंबिके। २ वातो वा गंधर्वा वात उष्णिक्
वातो वा ३ ऊर्ध्वा अस्य प्रजापतिराकाश उष्णिक्। ऊर्ध्वा अस्य समिधो ४ अनो अश्विरश्विनौ यजुः
अश्विनो तै॰ चामि। ५ अथ दिक्पालानां। त्रातारं गार्ग्य इंद्रस्त्रिष्टु प्त्रातारं। १। अग्निं विरूपो अग्निर्गाय
त्री। अग्निं दूतं॰ असि यमो भार्गव जमदग्निर्दीर्घतमसो यमस्त्रिष्टुप् असि यमो अत्र प्रणीतोदकस्प

र्शः। एषतेवरुणगोनिर्ऋतिर्यजुः। एतंतेनिर्ऋतेः पश्वाप्रणीतोदकस्पर्शः।४। इमंमेशुनःशेपोवरुणो
गायत्री इमंमेवरुण।५। वातोवराधवावातउष्णिक्। वातोवाधवयंवंधुः सोमोगायत्री। वयंसोम।७। त
मीशानंगौतमइंद्रशानोजगती। तमीशानं।८। प्रणीतोदकस्पर्शः। नमोस्तुदेवानंतोनुष्टुप्। नमोस्तुसर्पे
भ्यः।९। ब्रह्मप्रजापतिर्ब्रह्मात्रिष्टुप्। ब्रह्मजज्ञानं।१०॥ ॥अथचवादीनां। स्वर्गंदेवावासवस्त्रिष्टुप्।१। यज्ञोदे
वानांकुत्सआदित्यस्त्रिष्टुप्। यएतावंतश्चपरमेष्ठीरुद्रानुष्टुप्। मरुतोयस्यगोतमोमरुतोगायत्री। आ
ब्रह्मब्रह्मन्प्रजापतिर्ब्रह्मायजुः। इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री। मानस्तोकेकुत्सरुद्रोजगती। चित्रं
देवानांकुत्सःसूर्यस्त्रिष्टुप्। अयंहेप्रजापतिर्वनस्पतिर्यजुः। अयंहित्वाः रुहेम॥ ॥इतिहोममंत्राः
अथजप्यसूक्तानि॥ ॥विभ्राडितिसप्तदशार्चस्यानुवाकस्य आद्यायाविभ्राड्ततास्रिष्टणो ब्रह्म
एवः पंचम्याः अवत्सारःकाश्यपः षष्ठ्यावेनः सप्तम्याः कुत्सोष्टम्याः अगस्त्योनवम्याः ऋत
कल्हसुकसौदशम्याः ब्रह्म एवोथद्वयोः कुत्सोथद्वयोर्जमदग्निः पंचदश्यान्मेधः षोडश्याःकु
त्सस्त्र्यंत्यायाहिरण्यस्तूपआंगिरसः पंचम्याविश्वेदेवाः षष्ठ्याः सोमोन्यासांसूर्यआद्यापं

तुला॰

२३

चमी च जगती द्वितीयादितिस्रो नवमी दशमी च गायत्र्यस्त्रयोदशी पंचदश्यौ पथ्याबृहत्यौ चतुर्द्द-
शी सतोबृहती शेषाः सप्तत्रिष्टुभः स्ूर्यप्रीतये जपे विनियोगः। ॐ विभ्राड्बृहत्॰ पश्यन्॥१२॥ अभा-
दं ग्युत्सिवतिच तस्तृणो गौतमः सोमस्त्रिष्टुप् सोमप्री॰। अषाढं युत्सु॰ विष्णो॰ ५। अग्निर्मूर्धा विरूपा-
क्षो अग्निर्गायत्री अग्निर्मूर्द्ध॥१॥ उद्बुध्यस्व परमेष्ठ्यग्निस्त्रिष्टुप् बुध्यप्री॰ १ बृहस्पते अति॰। गृत्समदो
बृहस्पतिस्त्रिष्टुप् बृहस्पतिप्री॰ २। अन्नात्परिस्रुतः प्रजापत्यश्विसरस्वतीन्द्रा इंद्रो जगती २। शन्नो देवी
दध्यङ्ङाथर्वण आपो गायत्री १। केतुं कृण्वन्मधुच्छंदा अग्निर्गायत्री १। एते मंत्रा एव सूक्तानि॥ ॥
अथाधिदेवतानां॥ ॥षड्भिर्मंत्रान्मनो रुद्री यस्य परमेष्ठी ऋषिः आद्यानां षोडशानामे-
करुद्रस्ततो बहुरुद्रो आद्या गायत्री तिस्रो ष्टुप्लो बृहे जगत्यौ नमो हिरण्यबाहव इत्यत स्त्रिंशाद्य
जूंषि न्द्राय दत्वपरिष्टाद्बृहती। इमा रुद्रायेति जगत्यौ यातेरुद्रेत्यनुष्टुप् शततो बृहत्त्रिष्टुलो विकि-
रिद्रेत्याद्या द्वादशानुष्टुभः शेषाणि त्रीणि यजूंषि। रुद्ररूपी॰ नमस्ते रुद्र॰ दध्मः ६६ह

२३

वाम महइत्यंताः षोडशैव रुद्र सूक्तमिति रूपनारायणीये॥ प्रणीतोदकस्पर्शः॥ श्रीश्चतेउत्तरनारा
यणोनारायणस्त्रिष्टुप्‌ उमाप्रीतये॥१ यदक्रंदो भार्गवजमदग्निर्दीर्घतमसोऽश्वस्त्रिष्टुप्‌ छंदप्रीतये॥ य
ह अशीर्षेति षोडशानां नारायण उरुषोनुष्टुप्‌ अंत्यात्रिष्टुप्‌ विष्णुप्री॰१६॥ आब्रह्मन्‌ प्रजापतिर्ब्रह्मायजुः ब्रह्मप्री॰१ आशुः शिशान इति द्वादशानाम प्रतिरथ इंद्रस्त्रिष्टुप्‌ इंद्रप्री॰१२॥ यमाय त्वा दध्यङ्ङाथ
र्वणीयमायजुः यमप्री॰ यमाय स्वाहा। प्रणीतोदकस्पर्शः॥ कर्षिरसि दध्याङ्ङाथर्वणआपोनुष्टुप्‌
कालंप्रीय॰१ प्रणीतोदकस्पर्शः॥ मित्रावरुणोर्ज्यपयोरा त्रिजगती चित्रगुप्तप्रीय॰१॥ ॥अथ प्रत्यधि
देवतानां॥ अश्वाजरास इति सप्तदश सर्वश्चाद्याया वत्सप्रीरिंद्रवायू त्रिष्टुप्‌। द्वितीयाया विरूप इंद्रवायू
गायत्री। तृतीयाया गोतमो मित्रावरुणौ गायत्री। चतुर्थ्या विरूप इंद्रावरुणौ गायत्री। पंचम्याः संमु
क्त्रिष्टुप्‌। षष्ठ्या वामदेवो मिर्जगती॥ सप्तम्या विश्वामित्र इंद्राग्नी त्रिष्टुप्‌। अष्टम्या भरद्वाजो विश्वेदेवा गा
यत्री। दशम्या मेधातिथिरग्निर्गायत्री॥ एकादश्याः शाक्त्यः पराशरो मरुतस्त्रिष्टुप्‌ द्वादश्या अत्रिर्दुहिता दि

कु३

तुला॰ ३४

स्ववाचामृतस्त्रिष्टुप् त्रयोदशपा भरद्वाजो अग्निस्त्रिष्टुप्। चतुर्दशपा वसिष्ठ आदित्यो बृहती। षोडशपा
वामदेवोग्निस्त्रिष्टुप्। सप्तदशपानुशोधान कश्यप सविता त्रिष्टुप् अग्निऋषी॰ १२ आपोहिष्ठेति तिसृणां सिं
धुद्वीप आपो गायत्री अपांऋषी॰। स्योनापृथिवी दध्यङ्ङाथर्वणः पृथिवी गायत्री पृथिवी॰ १। सहस्रशीर्षा
नारायणः पुरुषस्त्रिष्टुप् अन्त्यानुष्टुप् विष्णुऋषी॰ १६ आशुः शिशानो द्वादशानाम प्रतिरथ इंद्रस्त्रिष्टुप्
इंद्रऋषी॰ १२ अदित्यै रास्नाद दध्यङ्ङाथर्वण इंद्राणी यजुः। इंद्राणीऋषी॰। १ हिरण्यगर्भ इति चतुर्णां हिर
ण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापतिऋषी॰। नमोस्तु सर्पेभ्य इति त्रयस्य देवाः सर्पा अनुष्टुप् सर्पऋषीत्वर्थः।
ब्रह्म जज्ञानं प्रजापतिरादित्यस्त्रिष्टुप् ब्रह्मऋषी॰। अथ विनायकादि पंचानां गणानां त्वा प्रजापतिर्गणपति
र्यजुर्गणपतिऋषी॰। अंबे अंबिके प्रजापतिरश्वोनुष्टुप् दुर्गाऋषी॰ २ नियुत्वान्वायवेति षण्णामाद्यायाः सम
दोहिती वायाः पुरुमीढाजमीढौ तिसृणां प्रजापतिः ४ षष्ठ्याम्बरांगिरसापुत्रा द्वितीयानुष्टुप् पंचमी
त्रिष्टुप् शेषा गायत्र्यः वायुऋषी॰ ६ ऊर्ध्वा अस्य समिध इति द्वादशानां प्रजापतिरग्निरुक्तलिंगा आकाशऋषी

राम ३४

34

।१२ यावार्कं शामेक्षातिथिरश्विनौ गायत्री अश्विभ्रौ॰। ।अथदिक्पालानां॥ ॥आशुः शिशानइतिद्वाद
शर्चं प्राग्वत्।१२ अच्छाजरासइति समदश र्चमाग्नेयं प्राग्वत्।१७ यमायत्वाद ध्युङुः थर्वणोयमो यजुः
यम प्रीं यमा॰ स्वाहा। प्रणीतोदक स्पर्शः। अयुत्वं तमितिरृचश्छ प्रजापतिरग्निस्त्रिष्टुष्पनिर्ऋतिप्री॰२
प्रणीतोदक स्पर्शः। अवत्वइमंमेवरुणेति द्वयोः शुनःशेपो वरुणो गायत्री त्रिष्टुप् पंक्तौ वरुणप्री॰२
नियुत्वान्वायवितिपडर्चंवायवीयं प्राग्वत्६ अषादमिति सौम्यं चतुष्टयं पूर्ववत्।४ रुद्राध्यायः
षडषष्टि मंत्र ईशानसूक्तं प्राग्वत्।६ प्रणीतोदकस्पर्शः नमोस्तु सर्पेभ्य इति त्रिचमनंत सूक्तं प्राग्वत्॥
ब्रह्मजज्ञानं प्रजापतिरादित्यस्त्रिष्टुप् ब्रह्मप्रीत्य॰ १ ॥ अथ वस्वादीनां। सुगावोदेवा वसवस्त्रिष्टुप् वसुप्री॰
१ इमागिरो गृत्समद आदित्यस्त्रिष्टुप् आदित्यप्री॰१ रुद्राध्यायो रौद्रं प्राग्वत्।६६ शुक्रज्योतिश्चेतिपण्णां
सप्तर्षयो मरुत आद्याश्चतस्रोबृहत्यः पंचमी जगती शेषा गायत्र्यो मरुतांप्री॰ ६ आब्रह्मन् प्रजापतिर्ब्रह्मा

सामवेदी

ब्ला·

३५

यद्युः ब्रह्मप्री·१ सहस्रशीर्षेति विश्वत्वं आग्वता १६ रुद्राध्यायो रौद्रं आग्वता ६६ वि आडिति सप्तदश
र्चमार्क आग्वेतः १७ वनस्पतेवीड्वंगः प्रजापतिर्वनस्पतिप्री·१ ततो व्याहृतिहोमादिवहिर्हेमांतं यद्यु
र्वैदिकं पूर्णाहुति प्राग्भाविकमेकं कुर्यात्। अथ सामगानां कुशंडिकानंतर प्रधानहोममंत्राः। उदुत्यं
प्रस्कण्व ४ सूर्यो गायत्री तिलाज्यहोमे विनियोगः। ॐ उदुत्यं· सूर्य स्वाहा। इदं सूर्याय। एवं सर्वत्र १। सते
पयांसि सोमः ४ सोमो गायत्री २। अग्निर्मूर्द्धा वरुणो भौमो गायत्री ३ अग्निर्विवस्व उषं मंडो जमदग्निर्बु
धो बृहती ४ बृहस्पते परिदीया प्रतिरथो बृहस्पतिस्त्रिष्टुप् ५ शुक्रं ते भर द्वाजः शुक्रस्त्रिष्टुप् ६ शन्नो देवी सिं
धुद्वीपः शांति गायत्री ७ कयानो वामदेवो राहुर्गायत्री ८ केतुं कृण्वन् मधुच्छंदाः केतवो गायत्री ९ अथ
अधिदेवतानां। आवो न्वजानं वामदेवो रुद्र त्रिष्टुप् १ आपो हिष्ठा सिंधुद्वीप उमा गायत्री २। स्योना पृ
थिवी मेधातिथिः स्कंद उष्णिक् ३ इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री ४ त्वमित्सप्रथा गोतमो ब्रह्मा बृ

राम

३५

35

सोमसाद्बृहती ७ । इंद्रंमिद्देवताउक्तमग्निं इ त्रिष्टुप् ६ आपंगोः सार्पराज्ञी यमोगायत्री ७ ब्रह्मजज्ञानं
ब्रह्माकालस्त्रिष्टुप् ८ चित्रइच्छिशोस्त्रिवयस्त्रिश्रेयुमोजगती ।९।। अथ सप्तर्षिदेवतानां। अग्निंदूतं
भरद्वाजोग्निर्गायत्री ।१ उदुत्तमंगोतम आपस्त्रिष्टुप् २ पृथिव्यंतरिक्षं विष्णुः पृथिव्युष्णिक् ३। सहस्रशीर्षा
नारायणोविष्णुरनुष्टुप् ४ इंद्राइषोदधीयइंद्रोगायत्री ५ एकाष्टका ६ वसिष्ठइंद्राणी त्रिष्टुप् ६ प्रजाप
तेनत्व हिरण्यगर्भः प्रजापतिः त्रिष्टुप् ७ ऋतवेदिं ज्ञाव मंव सिष्ठः सर्पा त्रिष्टुप् ८। एवब्रह्मप्रजापति ब्रह्मा
द्विपदागायत्री ९।। अथविनायकादिपंचानां।। आतनोगोरिवीतांगणपतिर्गायत्री १ इमस्तोमंकुत्स
दुर्गाजगती २ प्राणशिशुरिंद्रावायुरुष्णिक् ३ आदित्यतस्यनिधनकामआकाशोगायत्री ४। एषोउषा
उपाश्विनौगायत्री ५ अथलोकपालानां। त्वामिद्धिभरद्वाजइंद्रोबृहती १। अग्निर्वृत्राणिश्रौतोग्निर्गा
यत्री २ नाकेसुपर्णंयमोयमस्त्रिष्टुप् ३ वेत्याहीत्यादित्योनिर्ऋतिरुष्णिक् ४। इमंमेपुष्कलोवरुणोगा
यत्री। ५ वकन आवायु प्रतीचीनेड काशीतोवायुर्गायत्री ६ स्वादिष्ठयागंभीर ४ सोमोगायत्री ७ तत्सोगाय

तुला

३६

रुद्रईशानोगायत्रीसमानोअष्टाउशनाअनंतस्त्रिष्टुप् ९ ब्रह्मजज्ञानंब्रह्माब्रह्मात्रिष्टुप् १०॥ अ
थर्वसूक्तादीनां। त्वमग्निमस्येवामदेवोवसवोविराट् १ आदित्यैरिंद्रसरहाजआदित्योविराट् २ आवो
राजानंवामदेवोरुद्रास्त्रिष्टुप् ३ पवमानोअष्टुत्सतआदारस्यनमस्सोबृहती ४ ब्रह्मजज्ञानंब्रह्मा
त्रिष्टुप् ५ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री ६ आ[illegible]त्वासोमस्यसोमईशानोबृहती ७ इंद्रायमद
नेगौरीवितकोगायत्री ८ वनस्पतेवीड्वंगोवाअव्योवनस्पतिस्त्रिष्टुप् १०॥ इतिसामगानोहोम
मंत्राः॥ अथजप्यानिसूक्तानि। तत्रसौम्यंप्रकाव्यमितिद्वादश वेंइदामेइति वैष्णवीसंहिताहैस
व। आवोराजानमितिरुद्रसंहितारौद्रं। अन्येषांदेवानांहोममंत्राएव सूक्तस्थानेजप्याइतिदान
सागरः। स्कंदसंहितास्कंदस्यवैनायकीसंहिताविनायकस्येतिरूपनारायणः। तत्रापिमंत्रजपये
षांमंत्राणांगीताश्लोकैःवस्थितेनगीत्यैवजप्याइत्यपिरूपनाऽरायणाद्याः तत्रसूर्यस्यआगुक्त एवमं
त्रः। सूर्यप्रीतयेजपेविनियोगइत्यादिविशेषः॥ प्रकाव्यमुशनेतिद्वादशर्चस्याद्यानातिस्तृणां

राम

३६

36

वाजत्रिष्टुप्‌ प्रशो पाणां मादित्या गायत्री। सोमो देवता सामश्री॰ १२ लोम वुधवृहस्पति शुक्र शनिराहु
केतूनां होममंत्रा एव ज प्या॥ अथाधिदेवतानां॥ एकादश सामात्मिकायां रुद्रसंहितायां आवो राजा
नमिति वामदेव त्रिष्टुप्‌ शतहो गायेति वतः साम्नो वर्गष्ठ रुद्रो गायत्री। त्रयाणामा ऽपदो हसाम्ना वैश्वानर त्रि
ष्टुप्‌। त्रयाणां देवव्रत साम्नां शर्वयो रुद्रो त्यष्ट्या वि श्व देवा उत्कृतिः सर्वेषां रुद्रो देवता रुद्रप्रीत्य॰ ४ यो म
रा प॰ ३ मा मंत्रः आयुक्त० एकादश सामात्मिकायां स्कंद संहितायां आमंद्रै रितित्रयाणां वाव्र आनो
विश्वासु हव्य मिति त्रयाणां शाक्त्यो वृहती। प्रसेनानी रिति त्रयाणां कुत्स त्रिष्टुप्‌ पवित्रं तइति द्वयो रादि
त्यो जगती सर्वेषां स्कंदो देवता स्कंद प्रीत्यर्थे। आ प म प॰ ३ प श पा॰। नव सामिकायां विष्णु संहितायां।
इदं विष्णुर्विष्णुर्गायत्री प्रवद्वष्य वृहत्सो विष्णुर्जगती। प्रका [illegible] छन्दु शनेति वाराहस्य वाजित्रिष्टुप्‌ सह
स्रशीर्ष इत्य वगीतयो० पुरुषव्रतयोः पुरुषोऽनुष्टुप्‌ सर्वेषां विष्णुर्देवता विष्णुप्री॰ ६ प दा प ह मे प विष्णुः
। ब्रह्मेंद्र यम काल चित्रगुप्तानामधिदेवानां मयम्य पृथिवी नाऽत्याधिदेवतानां होममंत्रा एव स्कृता नि

उला·

३७

विलो विष्णुसंहिता भागवत। इंद्राणी प्रजापति सपर्वब्रह्मणां होममंत्रा एवं जप्याः॥ अथ विनायकादी
नां तत्र दर्द रिति दृशसामिकायां विनायकसंहितायां अदर्दरिति द्वयोरुद्रस्त्रिष्टुप् सुषाणास इति
द्वयोः। पृथ्वीत्रिष्टुभ् आरुनइति चतुः सामवर्गे आद्य यो गौरी वित अंत्ययोस्पालवैणाव श्व तन्नोगाय
त्री मृत्युस्मानाइति द्वयोरात्र्यस्यो स्नोरघोहिती यस्य वर्गपष्ठस्या ग्निर्देहस्यंती सर्वेषां विनायकोदेव
ता विनायकश्री· अ ४ द ५ ह ५ रु ४ त ४। दुर्गावाद्याकशाशिनां मिंद्रादिपू दूलोकपालानां च होममंत्रा
एवं जप्याः। सोमस्य प्रकाश्य सुशानइति भागवता द्वादशार्चे। ईशानस्यावोराजानमिति रुद्रसंहिता
भागवत। अनंतब्रह्मणोर्वष्णुनामादित्यानां च होममंत्रा एव। रुद्राणां रुद्रसंहिता। मरुतानां ब्रह्मणा
श्च होममंत्रो। अच्युतस्य वैष्णवी संहिता ईशस्य वरुद्रसंहिता भागवता। अर्कवितस्यत्पो होममंत्रो। ए
वं षडक्षजपानंतरं आहुति होमादि वर्हिर्कुंडिकाद्यौ होमांतं पूर्णाहुति आरभ्य विश्वशाखोक्तं सामवे
दी कुर्यात॥ ॥ अथाथर्ववेदिनः कुशंडिकानंतरं प्रधान होममंत्राः। विषासहिम थर्वा दिव्योजग

राम

३७

37

ती। होमेविनियोगः४ एवंसर्वत्र।१ शकधूममथर्वासोमोनुष्टुप्२ स्रेयामच्योब्रह्मालोमस्त्रिष्टुप्३ यद्राजानो
विभजंतविष्णुबुधः पंक्तिः४। ४ बृहस्पतिरोब्रह्माबृहस्पतिस्त्रिष्टुप्५ सुक्रोसेथर्वाशुक्रोनुष्टुप्६ सहस्रवा
हुर्नारायणःशनिरनुष्टुप्७ दिव्यंचित्रंकौशिकोरुद्रस्त्रिष्टुप्८। यस्तेपृथुरथर्वाकेतवस्त्रिष्टुप्९।। अथाधिदे
वतानां। मानोविदन्ब्रह्माईश्वरोनुष्टुप् आहिहिष्टासिंधुद्वीपउमागायत्री२ अग्निरिवमच्योब्रह्मास्कंद
स्त्रिष्टुप्३ प्रतद्विष्णुरथर्वाविष्णुर्गायत्री४ ब्रह्मजज्ञानमथर्वाब्रह्मात्रिष्टुप्५। इंद्रमेवब्रह्मेंद्रोनुष्टुप्पुरोहितःका
लोथर्वकालोनुष्टुप्८ यदाज्ञातंकौशिकश्चित्रयमोनुष्टुप्९। अथप्रत्याधिदेवतानां। समास्त्वाग्नेब्रह्माग्नि
स्त्रिष्टुप्। १ शन्नोदेवीर्ब्रह्माआपोगायत्री। २ भूमेमातर्ब्रह्माभूमिरनुष्टुप्३ इदंविष्णुरथर्वाविष्णुर्गायत्री। ४ इं
द्रजुषस्वब्रह्मेंद्रोनुष्टुप्५ प्रेतपादावथर्वेंद्राग्नीनुष्टुप्६ नत्वंज्ञानास्यथर्वाप्रजापतिरनुष्टुप्७ सर्पानु
सर्पाथर्वासर्पाःपंक्तिः८ येदिशामथर्वाब्रह्मात्रिष्टुप्९ अथविनायकादिपंचानां। निर्लक्ष्म्यद्वविरोद

बला।

३८

विनायकोनुष्टुप् ९ पृतनाजितमथर्वा दुर्गा त्रिष्टुप् २ अंतरिक्षे वायवे ब्रह्मा वायुरनुष्टुप् ३ आग्न्यंतो
थर्वा आकाशस्त्रिष्टुप् ४ संवन्नया थांगिरा अश्विनावनुष्टुप् । ५ ॥ अथादिकालानां ॥ इममिंद्र ब्रह्मेन्द्रस्त्रि
ष्टुप् १ अग्ने मर्त्ये ब्रह्माग्निस्त्रिष्टुप् २ यमो मृत्युर्ब्रह्मा यमस्त्रिष्टुप् । ३ । असितं निऋतिरथर्वा निर्ऋतिरनुष्टुप्
४ ये पश्चा[illegible]त्रुह्रक्षत्यथर्वा वरुणस्त्रिष्टुप् ५ वायोः सवितरथर्वा वायुस्त्रिष्टुप् ६ यउत्तरतो ब्रह्मा सोम
स्त्रिष्टुप् ७ धाता ददात्वंगिरा ईशानो गायत्री ८ अनंतं विततमथर्वा ऽनंतः पंक्तिः । ९ ब्रह्मा परं युज्यतां
मथर्वा ब्रह्मा त्रिष्टुप् १० अथ वस्वादीनां । यानावहद्ब्रह्मा वसवस्त्रिष्टुप् १ । आदित्येभ्यो ब्रह्मा आदित्यास्त्रिष्टु
प् २ रुद्रजलाष ब्रह्मा रुद्रास्त्रिष्टुप् ३ मरुतामन्वेयर्वा मरुतस्त्रिष्टुप् ४ इमा ब्रह्म ब्रह्मा ब्रह्मा त्रिष्टुप् ५ पत
द्विलो ब्रह्मा विष्णुर्गायत्री ६ रुद्रजलाष ब्रह्मा रुद्रस्त्रिष्टुप् ७ वत्सो वि राजो ब्रह्मा कस्त्रिष्टुप् ८ वनस्पतेर्वा
ड्गाथर्वा वनस्पतिस्त्रिष्टुप् ९ । इत्यथर्वविदोहोममंत्राः । अथ सूक्तानि । विषासहिं सहमानमिति पल्ला

राम

३८

38

मथर्वा सूर्यो ऽयंगती सूर्यप्रीतये जपे विनियोगः ॥ ६ शंकष्टमिति चतुर्णामथर्वा सोमोनुष्टुप् सोमप्री
॰ त्वयामन्यो इति सप्तानां ब्रह्मा लोम त्रिष्टुप् लोमप्री॰ ७ सामष्टो शो इति चतुर्णामथर्वा बुधोनुष्टुप् बुधप्री
॰ सद्यो दधिक्रेय इत्यष्टौ ब्रह्मा बृहस्पतिस्त्रिष्टुप् बृहस्पतिप्री॰ १ शुक्रोसात्यथर्वा शुक्रोनुष्टुप् शुक्रप्री॰ १ प्रा
णायनम इति तिसृणां ब्रह्मा शनिस्त्रिष्टुप् शनिप्री॰ । राहुराजानं ब्रह्मा राहुस्त्रिष्टुप् राहुप्री॰ १ यस्तेष्टथुरि
ति त्वचष्टाय वक्रितवा त्रिष्टुप् ब्रह्मा यथैरंग्मानुष्टुप् केतुप्री॰ ३ अथाधिदेवतानां ॥ मानो विदान्निति चतसृ
णां ब्रह्मा रुद्र त्रिष्टुप् ईश्वरप्री॰ ४ अग्निरिवमन्यो ब्रह्मा स्कंदप्री॰ १ यन्नइंद्र इति पंचानामथर्वा विष्णुस्त्रिष्टुबं
त्या गायत्री विष्णुप्री॰ । ब्रह्मजज्ञानमिति सप्तानामथर्वा ब्रह्मा त्रिष्टुप् ब्रह्मप्री॰ ९ इंद्रोजयातीति त्वचष्टब्र
ह्मेन्द्र विष्णु त्रिष्टुप् इंद्रप्री॰ ३ यमोमृत्युरिति स्वचष्टा ब्रह्मा यमस्त्रिष्टुप् यमप्री॰ ओहित ॰ काल इति द्वयो
रथर्वा कालोनुष्टुप् कालप्री॰ ८ अथर्वांगिरसपरस्तादिति चतसृणामथर्वा चित्रगुप्तस्त्रिष्टुप् चित्रगुप्तप्री॰ ।

तुला·

३८

अथ ग्रत्यधिदेवतानां॥ अग्नेर्मन्व इतित्वच स्य ब्रह्मा अग्निस्त्रिष्टुप् अग्निर्देवता शन्नोदेवीरिति वत स्थ्णां ब्रह्मायो
गायत्री अप्सु·४ सत्यं बृहदृतमिति ब्रह्मा क्षितिस्त्रिष्टुप् क्षितिर्दे·१ यन्न इंद्र इतिपंचर्वं चैलव प्राग्वत्सप्।
इद्रेद्रापापाहीममंत्रावेव। प्रजापते नत्व दिति हयो ब्रह्मा प्रजापतिस्त्रिष्टुप् प्रजापतिर्दे·२ शेरत्केत्प
ष्ठनामथर्वा सर्पाः पंक्तिः सर्पदे·८ ब्रह्मजज्ञानमिति समर्चब्राह्मं प्राग्वत्।७ अथ विनायकादिपंचा
नां। निर्लक्ष्म्यमिति चत स्थ्णां इविणादा किनायको नुष्टुप् विनायकदे·४ पृतनाजितमिति दुर्गायाहे
ममंत्र एव।१ वायोः सवितुरिति द्वयोरथर्वा वायुस्त्रिष्टुप् वायुर्दे·२ पुरं यो ब्रह्मण इति चत स्थ्णां ब्रह्मा
काशानुष्टुप् आकाशदे·४ आश्विना ब्रह्मणा स्य ब्रह्मा अश्विनौ त्रिष्टुप् अश्विदे·१ अथ लोकपाला
नां॥ इंद्रो जयातीतित्वचः पूर्ववत्।३ अग्नेर्मन्व इतित्वचः पूर्ववत्॥ यमो मृत्युरिति त्वचः पूर्ववत्।३ य
स्या मा अश्मन्नीतिति स्थ्णां ब्रह्मा निर्ऋतिस्त्रिष्टुप् निर्ऋतिर्दे·३ उदुत्तमं ब्रह्मा वरुणस्त्रिष्टुप् वरुणदे·।

39

राम

३८

२१ वायो ४ सवितुरिति वायवीयो हृचः ४ प्रागवतः २ शकध्रूममिति चतस्रः सोमस्य ४ मान्नो विदन्निति चत
स्र ईशस्य ४ शं रत्नकेत्पृष्ठावनं तस्थ ८ ब्रह्मजज्ञानमिति सप्त ब्रह्मणः ४ । ७ एतानि प्रागवतः ॥ अथ यवबादीनां ॥ व
सूनां । वसूनामादित्यानां रुद्राणां मरुतां नो ममत्राएव । ब्रह्मजज्ञानमिति सप्त ७ ब्रह्मणः यत्र इइइ तिपंचास्यु
तस्य पमानो विदन्निति चतस्र ईशस्य ४ विद्मामहि मिति षडर्कस्य ६ एतानि प्रागवतः वनस्पतेहोममंत्र स्वजुषः
एवं सूक्तानि जप्त्वा अथातानहोमादि संपाव सागहोमांते शर्णा इति प्राचीनं सुशास्त्रीयं कुर्यात । एवं शर्णाद्
तेः प्राचीन कर्माणि कृते गुरुर्यजमान सहितः पुष्पधूपो माषसक्कवलिं वाद्य यत्र ध्वनादं कारयत् ३ । मंडप
पूर्वद्वारमध्यप्रदेशे ॐ त्रिप्रसर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरा मरेशः । संवीज्यमानो प्सरसां गणेन रक्षा
ध्वरं नो भगवन्नमस्ते । इतीड्माध्वरं इंद्रायन मइतीड्गधादिभिः पूजयित्वेंद्रायेष पुष्पाद्युपहितोमाष
सक्कवलिर्नमः कोचिद्ध्वजपताकादाननिहैवकुर्वंतिनतु मंडपरचनाकाले । ततआग्नेय्यां ॐ इंद्रे हि सर्वा
मरुद्धव्यवाहस्तुनि प्रवीरैरसितानि ज्ञुष्ट । तेजोवतालोकगणेनसा ईममाध्वरं रक्षकावेनमस्ते । इत्यमिमावा

तुला

४०

40

साग्नयेनम इति पूजयित्वाग्नयेएषपुष्पाद्युपहितो माषभक्तबलिर्नमः ततो दक्षिणद्वारमध्यदेशे ॐ
एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित दिव्यमूर्ते शुलास्त्रसानंद शुचामधीश शिवाय नो पाहि मखं नम
स्ते। इति यममावाह्य यमाय नम इति पूजयित्वा यमायैषपुष्पाद्युपहितामाषभक्तबलिर्नमः। ततो नै
र्ऋत्ये ॐ एह्येहि रक्षोगणनायक त्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि शुभाधिनाथ लोके
श्वर त्वं भगवन्नमस्ते। इति निर्ऋतिमावाह्य निर्ऋतये नम इति पूजयित्वा निर्ऋतये एषपुष्पाद्युपहि
तो माषभक्तबलिर्नमः। ततः पश्चिमद्वारमध्यदेशे ॐ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसम
हाप्सरोभिः। विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते।। इति वरुणमावाह्य वरुणा
यनम इति पूजयित्वा वरुणायएष पुष्पाद्युपहितामाषभक्तबलिर्नमः। ततउत्तरमध्ये ॐ एह्येहिय
ज्ञेममरक्षणाय मृगाधिरूढः सहसिद्धसंघैः। प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नम

राम

४०

७

स्मे॥ इति वायुमावाह्य वायवे नम इति पूजयित्वा वायवे एष पुष्पाद्युपहितो माषभक्तबलिर्नमः। ततउत्त
रेशानमध्यदेशे ॐ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धं। सर्वौषधीभिः पितृगणैः सहैव गृहा
ण पूजां भगवन्नमस्ते इत्यनेन सोममावाह्य सोमाय नम इति पूजयित्वा सोमाय एष पुष्पाद्युपहितो माषभक्त
बलिर्नमः ततईशाने ॐ एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगकरेण सार्द्धं॥ लोकेन भूतेश्वर यज्ञ
सिद्ध्यै गृहाण पूजां भगवन्नमस्ते इतीशमावाह्येशानाय नम इति पूजयित्वेशानाय एष पुष्पाद्युपहितो
माषभक्तबलिर्नमः। ततो नैरृत्यपश्चिमयोर्मध्ये ॐ एह्येहि पातालधरामरेन्द्रनागांगनाकिंनरगीयमान
।यक्षोरगेन्द्रामरलोकसार्द्धमनंतरक्षाम्बरमस्मदीयमित्यनंतमावाह्यानंताय नम इति पूजयित्वानंताय एष
पुष्पाद्युपहितो माषभक्तबलिर्नमः। ततः पूर्वेशानयोर्मध्ये ॐ एह्येहि विश्वाधिपते मुनीन्द्र लोकेन सार्द्धं पि
तृदेवताभिः। सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं शिवाय इति ब्रह्माणमावाह्य ब्रह्मणे नम इति
पूजयित्वा। ब्रह्मणे एष पुष्पाद्युपहितो माषभक्तबलिर्नमः॥ ततः पूर्वस्यां दिशि किंचिद्भूमिमुपलिप्य तत्रैव

तुला।

५२

५१

मंडपं

तोरणं

लोकेयानिसृतानिस्थावराणिचराणिच। ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिमे। देवदानवगंधर्वाय
क्षराक्षसपन्नगाः। ऋषयोमनवोगावोदेवमातरएवच। सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः। ब्रह्माविष्णुरुद्रश्चक्षेत्रपालागणैःसह। रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः। त्रैलोक्यस्थेभ्यःस्थावरेभ्योभू
तेभ्योनमः। त्रैलोक्यस्थेभ्यःस्थावरेभ्योभूतेभ्योनमः। ॐब्रह्मणेनमः। ॐविष्णवेनमः। ॐशिवायनमः। ॐदेवेभ्यः। ॐदानवेभ्यः। ॐगंधर्वेभ्योयक्षेभ्यो। राक्षसेभ्यो। पन्नगेभ्यो। ऋषिभ्योमनुभ्योभ्यो। गोभ्यो देवमातृभ्यो
नमइतिप्रत्येकंगंधादिभिःसंपूज्यैतेरेवमंत्रैरेतेभ्योभूमाववतेभ्यएषमाषभक्तबलिंप्रत्येकंदद्यात्। केचि
त्तुमंत्रद्वयंपठित्वा एतेभ्योनमइतियुगपत्सर्वाबलिंवैकमेवदद्युः। अत्रकेचित्॥ मंडपंपरितःसूत्रेण
वेष्टयेत्॥ भूमिर्भूमिमगान्माता मातरमप्यगात। भूयास्मपुत्रैःपशुभिर्योस्मान्द्वेष्टिसभिद्यतामितिभूमिं
स्पृशेत्। ततस्तोरणस्पर्शः। तुलायज्ञस्यसर्वस्यमुदंस्तुनामतोरणं। महावीर्यंमहाकायंसुवर्णसदृशप्रभं। अत्रद्वारेस्थितःशैलोमाल्यवांश्चमहाद्युतिः। एहिरेसुप्रसन्नतोरणतुलायज्ञगृहंरक्षविघ्नंविनाश

५२

विनाशय। अग्ने [illegible] न्निमीलइत्याह्वानं दक्षिणाशागतं तत्र स्थूलीमाख्यं नामतोरणं। महावीर्यं महाकायं भि
न्नांजनसमप्रभं। तत्र द्वारे स्थितः शैलो विंध्यमाना महाव पुः ३ एह्येहि श्लामना मकतोरण तुलादानयज्ञस्य हरस्व
विघ्नं विनाशय। इषेत्वेत्याह्वानं॥ पश्चिमां दिशमाश्रित्य सुदंष्ट्रं नामतोरणं। द्वारि तत्र स्थितः शैलो गंधमा
दन संज्ञः। एह्येहि सुदंष्ट्रालिधतोरणे त्यादि। अग्न आयाहीत्याह्वानं। उत्तरस्यां दिशि तथा विकटं नामतोरणं॥
महावीर्यं महाकायं मुहस्फटिकसन्निभं॥ तत्र द्वारि स्थितः शैलो हिमवांश्च महाद्युतिः। एह्येहि विकटतोरणे
त्यादि। शन्नो देवीरित्याह्वानं पूर्वद्वारं वितानं स्याद्दक्षिणं पुष्पकं भवेत्। पश्चिमे तु ध्वजं नाम कामदं चोत्तरं स्मृ
तं। एह्येहि वितानाख्य पूर्वद्वार तुलादानयज्ञस्य हरस्व विघ्नं विनाशय। एह्येहि पुष्पकाख्य दक्षिणद्वारः एह्ये
हि ध्वजाख्य पश्चिमद्वारः। एह्येहि कामदाख्योत्तरद्वार। अथ कुंकुमगंधपुष्पधूपदीपबलीनादाय। ॐ मुखद्वाय
ऋग्वेदस्वरूपाय इंद्रदैवत्याय माल्यवत्पर्वतसहिताय वितानाख्य पूर्वद्वाराश्रिताय द्वारपालसहिताय सु
प्रभनाम्ने अश्वत्थतोरणाय नमः इति कुंकुमगंधपुष्पधूपदीपबलीन्दद्यात्। शोभना य यजुर्वेदस्वरूपाय यमदैवत्या

तुला॰

४२

यविंध्यपर्वतयुताय पुष्पकाख्यदक्षिणा द्वारसमाश्रिताय द्वारपालसहिताय लीमनाम्ने औदुंबरतोरणाय
नमइतिकुंकुमादिदद्यात्॥ तुर्थमीय सामवेदमूर्त्तये वरुणदेवत्याय गंधमादनपर्वतसहिताय घ्रनना
मपाश्चिमद्वाराश्रिताय सुदंष्ट्राख्यप्लक्षतोरणाय नमइतिकुंकुमादिदद्यात्। अथर्ववेदमूर्त्तये सोमदे
वत्याय हिमवत्पर्वतसहिताय कामदाख्योत्तरद्वाराश्रिताय द्वारपालसहिताय विकटाख्य तोरणायन
मइतिकुंकुमादिदद्यात्॥ मंडपस्तंभेषु सर्वेभ्योनमइति चंदनादिदद्यात्। वंशेषु किंनरेभ्योनमः॥ पट्टेष
न्नगेभ्योनमः। ततः क्षेत्रपालाय मंडपस्याधः पूजावलिश्च कुमुदः कुमुदाक्षश्च पुंडरीकोथ वामनः।
शंकुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः॥ ब्रह्मानागश्च एवादिदशैते ध्वजनायकाः। ॐ
कुमुदसहिताय पूर्वध्वजाय नमइति गंधादिदद्यात् कुमुदाक्षसहिताया ग्निकोणध्वज
यनमः पुंडरीकसहिताय दक्षिणध्व॰ वामनसहिताय निर्ऋतिकोणध्व॰ शंकुकर्णसहिता
याग्निकोणा[illegible]नः शंकुकर्णसहिताय पश्चिमध्वज॰ सर्वनेत्रसहितवायुकोणध्वजाय॰॥

४२

६

रुद्र ४

मुमुखसहितायोन्तरध्वः सुप्रतिष्ठितसहितायेशानकोणध्वजाय· वृषसहितायोर्ध्वदिग्ध्वजा आनागसहि
तायाधोदिग्ध्वजायेत्पतमाङ्कुश्च ततः साचार्य ऋत्विक्कोयजमानश्चरणप्रक्षालनाचमनादि कृत्वा मध्यवेद्या
मुपविश्य पञ्चगर्भपोडशारोपरि तुलाञ्छापयित्वा दक्षिणप्रांतवंधादारभ्य तदधिष्ठितदेवताः पूजनं कुर्या
त्। ईशः शशी मारुत सूर्यश्च वह्निर्विश्वकर्मा गुरुरंगिरोग्निः प्रजापतिर्विश्वेशः जगद्विधाता पर्जन्यः शंभुर्वि
ष्टदेवताच सोमश्च धर्मो गिरिराज अश्वि जलेशा मित्रावरुणो मरुद्गणाः। धनेशो गंधर्व ज्वलेश विद्युदे तेत्व विश्व
तिर्विश्वेदेवाः। स्याल्पश्च विंशः पुरुषः पुरातनो यश्चोत्पमानश्च कलयामहात्मा। अत्रीगिरोग्भाः पर्जन्यः शंभोः मित्रा
वरुणयोश्च मिलितयोर्देवतात्वं।। एतेषां वलक्षणं प्रागुक्तं। अथ शंखचक्रं गदाम्बुजैर्वामयोः करयोः क्रमात्।
ऊर्ध्वे शंखमधः पद्मं गोविंदस्य कापि लांगक इति लक्षणयुतास्य गोविंदप्रतिमा तुला मध्ये मौक्तिकस्र
जा सुवर्णस्त्रिं खलया हाटशांगुलपातया वलंब्याय यथा तुलाञ्छितः कन्नति सुखं पश्यति। अत एव साग्र

१ ध्वात्वा दक्षिणादिना प्रतिष्ठा समूजयेत्। ततो हस्तक्षरणार्थं स्थितेषु धर्मराजप्रतिमे अपि तुलासमीपे मुन्नारणा २

पूर्वकि पूज्योइदमर्घ्यं नेच्छंति। ततः स्वशाखोक्ता

तुला प्रतिमास्थूलापिकार्या। एतादेवता आवाहास्मुनारणां

शांति सर्वे पठेयुः। ततोधिवासनदक्षिणामाचार्यलिंगर्भ उदङ्मुखे स प्राङ्मुखोपविष्टाय यजमानो

४३ दद्यात्। एकलिंगदेवसामग्री तो हिरण्यसामग्री आचार्याय देया। तद्यथा। अद्येत्यादि अमुकगोत्राय

मुकवेदांतर्गतामुकशाखाध्यायिनेमुकशर्मणे गुरवे कृतस्य तुलादानाधिवासनकर्मणः प्रतिष्ठा

सिद्ध्यर्थं दक्षिणामेतानि हेमानि कुंडलयुगयज्ञोपवीतकटकयुगांगुलीयकान्येतानि च वासांसि एते

च शय्येमुकगोत्रोमुकशर्माहं तुभ्यं संप्रददे न ममेति गुरवे दद्यात्। स्वस्तीति स वदेत्। एवं स्वलिंगेभ्योपि

ऋग्वेद्यादिक्रमेण एक युग्मं दद्यात्। ते च स्वस्तीति ब्रूयुः। यद्वा वरणक्रमेण गुरुरक राधः। स्थिता न्ना

करे स्यः सर्वे स्वायुग्म पदे कोच नामोच्चारणेन कुंडलादीनि दद्यात्। ते च गुरुर्हिरण्यमेकयुग्ममन्येऽपि इति

विलज्य गृह्णीयुः। उपोषितः स ततः पूर्वकृत्यैव मुधिवासनं। उपवासी भवेदेवमशक्तौ न कर्मिष्यते। गुर्वी

द्गीतांसुवासश एवमधिवासनंकृत्वा सर्वेतत्रैव नृत्यगीतादिना जागरणेन निशांनयेयुः। असंभवे
तु सद्य एवाधिवासनंकृत्वा तुलादिदानंकार्यं सद्योधिवासनं वा एकभुक्तेनाविकलो नरइति वचना
त्॥ ततः प्रभाते कृतस्नानादिनित्यक्रियाः सर्वे संवेयुः यजमानकृष्णवत्। पुण्याहवाचनं कुर्यात्। ततश्च
त्विजो यजमानान्वारब्धाः स्व स्व कुंडे ग्रहवेद्यादिक्रमेण हवनं कृत्वा तिलघृतं यथाशास्त्रं कर्मसमाप्तिं। कु
र्युः तत्र ब्रह्मदक्षिणानाम्निदानेनानतिसिद्धेः ततोतेन हेमचतुष्टयेन कर्मांगदेवताः प्रीयंतामितिज
लंक्षिप्त्वा परिपूर्णतां वाचयेत्॥ ततो महावेदिपश्चिमोपविष्टं सकुटुंबं यष्टयोदक्षैर्नु मानं प्राङ्मुखा
प्रत्यङ्मुखावामंगलगीतवाद्यघोषपूर्वकं यजमाने कुंडसमीपस्थकलशचतुष्टयोदकेना चाराद्यादिक
लशोदकेन च स्व स्व मंत्रैरभिषिंचेयुः४ ।पौराणे श्रुतेयथा॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्व
राः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते। आखंडलो
ग्निर्भगवान्यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथाशिवः। ब्रह्मणासहितः शेषो दिक्

तुला०

४८

44

ते १

कला पांतु मे सदा। कीर्त्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रियामतिः। बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः
कांतिस्तु मातरः। एतास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः।
ऋषयो मनवो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्राणि सर्वशास्त्रा-
णि राजानो वाहनानि च। औषधानि च रत्नानि कालस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि ज-
लदा नदाः। एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥ ततः सर्वौषधीभिरनुलिप्य शुद्धजलेन सुस्नानमा-
चम्य यजमानः शुक्लमाल्यांबरधरः कृतव [illegible] त्रिया पुष्पकरेण गृहीतकुसुमांजलिः स्कलांगिः प्रदक्षि-
णीकृत्य तत्पश्चिमे महावेद्यां प्राङ्मुख उपविष्टः स्नात्वा मनुमंत्रयेत। ॐ नमस्ते सर्वदेवानां शक्तिस्त्व-
मत्यमाश्रिता। साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥ एकतः सर्वसत्यानि तथानृतशतानि च।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता। मां तोलयंती सं-
साराद् उद्धर स्वनमोऽस्तु ते। योऽसौ तत्त्वाधिपो देवः पुरुषः पंचविंशकः। स एषोऽधिष्ठितो देवि त्वयि तस्मा-

राम ४८

नमोनमः॥ ततस्तुलामध्यस्थं वितगोविंदानुमंत्रयेत्॥ ॐ नमोनमस्ते गोविंद तुलापुरुषसंज्ञक। त्वं हरे तारय
स्मान्स्मात्संसारसागरात्॥ इति गृहीतकुसुमांजलिना तुलां हरिं चाभ्यर्च्य पुनस्तुलां प्रदक्षिणीकृत्य
गंधमाल्यालंकरणालंकृतांश्च खड्गचर्मकवचा दक्षिणकरमुष्टौ हेमसूर्यप्रतिमां वामकरमुष्टौ धर्मराजप्रति
मां चादाय नित्यदेवं च गृहीत्वा प्राङ्मुखस्तत्र शिक्यतुलामारुह्य तुलावलंबितहैमहरिप्रतिमामुखं पश्यन्ति
षेत। ततो ऋत्विजो दक्षिणातोयजमानात्स्याधिकं सुवर्णादि निदध्युः। पुष्टिकाम स्वाधिकृदानेन स्व मिसंस्था
तां कुर्यात्। ततः स्वर्णं गोदोहमात्रं वा स्थित्वा मंत्रमेतत्॥ ॐ नमस्ते सर्वभूतानां साक्षिभूते सनातनि। पितामह
न देवि त्वं निर्मिता परमेष्ठिना॥ त्वया धृतं जगत्सर्वं सहस्थावरजंगमं। सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि॥
वह्निपुराणे। जपन्मंत्रांश्च पौराणान् स्तुवंस्तुमेति वै ततः। यथा पवित्रमतुलमपत्यं जातवेदसः। यस्मात्त्वेन पवि
त्रेण सुवर्णं हि पुनातु माम्। रुद्रस्य तु महत्तेजः कार्त्तिकेयस्य संभवः। तथाग्निर्देवताः सर्वाः सुवर्णं हि तदात्म

तुला॰

कं। तथाश्चेनश[illegible]पे न्कृतं मेष्ठ्वकायेन मनसाथवा। इक्षुकृतंतत्सुवर्णं छियात्तस्तुक्तिः पराभुला। ततोव
तीर्यतुलितद्रव्यादिमावायीयादङ्मुखायोदकपूर्वं दद्यात्। अथ परमहंसस्थलिंगम्भउदकपूर्वमेव दद्या
दितिवाराहपुराणोक्तं स्कंदपुराणोक्तं तुलापुरुषदानं इति रूपनारायणः। गुर्वादिभ्यः सहदेवोत्सृज्य दद्यादिति दानसागरादयः।
अत्राद्यपक्षे दानविधिः। वेदिपश्चिमभागे प्राङ्मुखोपविष्टो यजमानोऽद्येत्यं कुशोदकेनात्रिः प्राङ्
माञ्चलकुशजलपाणिर्देशकालौ स्मृत्वा। एकैकमन्वंतरकालावच्छिन्न प्रति लोकपालस्थाननिवासस
र्वकालार्कवर्णकिंकिणीजालमालिविमानकरणकालेकाश्वरः प्रजासहित श्री विष्णुपुरगमनपूर्वक
कल्पकोटिशतकालावच्छिन्न श्री विष्णुपुराधिकरणकमहीयमानत्वावस्थानानंतर भूपाल मौलिम
णिरंजितपादपीठ श्रद्धान्वित यज्ञ सह प्रयाजिदीप्त प्रताप जितसर्वमहीपलोकभूमंडलाधिकरण
कराजराजत्वकामो विष्णुप्रीतिकामः पापक्षयकामो वामुकगोत्रोमुकशर्माहमेतत्सुवर्णसमतोलित

४५

45

४५

९२

सुवर्णादिद्रव्याद्इमग्निदैवतं तत्संअमुकगोत्राय अमुकवेदांतर्गतामुकशाखाध्यायिने मुकशर्म
णे गुरवे त्वद्दत्तजया नानावेदाध्यायिभ्यो नानानानागोत्रेभ्यो नानाशर्मभ्योन्येभ्यो ब्राह्मणेभ्योदीनानार्थे
भ्यश्च संप्रददे न मम इति जलं गुरुहस्ते क्षिपेत्।। ततः ब्राह्मणो स्यायजमाने सोंकारमुच्चैः स्वरेण क्षत्रिये
यजमानेन निरोंकारमङ्ग स्वरेण वैश्ययजमाने उपांशु शूद्रे यजमाने मनसा ब्रह्मन्नस्काः सावित्री पवि
त्वाद्यं स्पृष्ट्वा स्वशाखा ह्वांका मेकृति पठेत्। इति सामान्यतउक्तः अतियह अकारइ हाप्य तु संधे य।
ततः पुनर्देशकाल स्मरणादि द्रव्याद्इ मित्यं तमुत्सकाञ्ज परमग्निदैवतम मुकगोत्रेभ्यो मुकामुकशा
खाध्यायिभ्यो मुकामुकशर्मभ्यो ऋत्विग्जापकद्वारपालेभ्यो युष्मद्दत्तजयानानावेदाध्यायिभ्यो ना
नानागोत्रेभ्यो नानाशर्मभ्योन्येभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च संप्रददे न मम इति ऋत्विग्भ्यो दिल्ले स
कुशाक्षतं जलं क्षिपेत्।। तेच पूर्ववत् ब्रह्मन्नस्काः सावित्री पवित्वाद्यं स्पृष्ट्वा स्वस्वका मेकृति पठे

त्येला
५८

ग२

दानमगवादिमितोत्तर[illegible]णानेकमेणा गुरुवरो धश्छिता तानदहिणा वारेरमः सर्वेभ्यो युगपदेवगु
र्वादीनां सर्वेषां गोचा युञ्जार्थं सर्ववक्रपदेवोत्सर्गः। ततः पुनर्देशकालौ स्मृत्वाद्यैतत्तु लाभ रूपमह
दानप्रतिष्ठार्थं दक्षिणां शतं सुवर्णाद्यामरत्नानि चामुकगोत्रेस्यामुकामुकवेदांतर्गतामुकामुक
शाखैकदेशाध्यायिस्यामुकशर्मस्यागुर्वादिभ्यो युष्मभ्यामहं संप्रददे इति सकुशाक्षतं जलं त उत्स
दृष्टात्। ॐ स्वस्तीत्यादि आयन्ता। पश्चाद्गुर्वादिभ्यो सागशः प्रतिपादितेभ्यो रूपनारायणामते हयुरवर्दे
दानानंतरं सुवर्णमात्रं दक्षिणां संकल्प्य सर्वेभ्यो दद्यात्। [illegible] दानानंतरं चतेभ्यो [illegible] एकैकं सु
वर्णं दक्षिणां दद्यात्॥ कश्चित्तु मुक्ताफलसह आर्ह्य योपकल्पितां भूमिं च गुरवे दत्वा फलाभरस
हस्ताः [illegible] दक्षिणां दद्यादिति। यदात लाभाख्ये [illegible] गुरवे [illegible] विप्रेभ्यो दीयतेत
दाप [illegible] दानार्थे [illegible] दक्षिणा यथाशक्ति देया। हेमाद्रि [illegible] कार्दिकेया

गम
५८

[illegible]न स्वरूपं दक्षिणानियमो यः कर्तृकं तु सुवर्णं दक्षिणेति ॥ अथो[illegible]यामरत्नादिना गुर्वर्त्विज
प[illegible]तोष्य तद्गुरुचरणाभ्यां स्वकामोद्देशं दद्यादिति परितोषार्थं यामरत्नादि दद्यादित्यर्थः ॥ त
तः सह सर्वब्राह्मणा लोजनं संकल्प्य ॥ अद्येत्यादि कृतस्य तुलादानस्य यथावत्फलप्राप्तये नाना
[illegible]गोत्रानानावेदाध्यायिनो नानानाशर्मणो ब्राह्मणान् यथोपपन्नेनान्नेन यथाकालं भोज
यिष्ये ततश्च पुनः पूर्ववत् ॥ पुण्याहवाचनं कृत्वा प्रदक्षिणेन गत्वा गंधपुष्पादिभिरुपचारैरावाहि
तदेवताः प्रत्येकं युगपद्वा पूजयित्वा प्रणमेद्यजमानः ॥ ततः स एव गुर्वादियां तु देवगणाः सर्वे
[illegible]मामादाय पार्थिवी ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय चेति उत्तिष्ठ ब्रह्मणस्पते । अस्मात् रमिदद्
यद्दुति [illegible] ततः प्रक्षेपेण पीठदेवतामंडपादि देवताश्च विसर्जयेत् ॥ ततो यजमान इ[illegible]तिमान्मंडप

दे

[illegible]

... [illegible] नारायण [illegible] ॥ ७॥

५८